# सप्तमः पाठः । सूक्तिसुधा । (कण्ठस्थीकरणार्थम्)

संस्कृतभाषा सुभाषितैः समलङ्कृता खलु । सुभाषितेभ्यः उद्धृताः नैकविधाः संस्कृतसूक्तयः न केवलं संस्कृते, अपि तु अन्यभाषास्वपि मार्मिकतया उत्स्फूर्ततया च उपयुक्ताः दृश्यन्ते । प्रायः जनाः सम्पूर्णं सुभाषितं न स्मरन्ति परन्तु सूक्तयः तेषां जिह्वाग्रे तिष्ठन्ति। भाषावैभवं वर्धयन्त्यः एतादृश्यः सूक्तयः छात्रैः सम्यक् पठितव्याः स्मर्तव्याः च ।

**न चोरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।**
**व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ।।१।।**

[विद्याधनं चोरहार्यं न (अस्ति), राजहार्यं न, भ्रातृभाज्यं न, भारकारि (अपि) न (अस्ति)। व्यये कृते अपि (तत्) नित्यं वर्धते एव। (सत्यमेव विद्याधनं) सर्वधनप्रधानम् (अस्ति) ।]

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम् ।।२।।**

[लघुचेतसां (कृते) अयं निजः परः वा इति गणना (अस्ति)। उदारचरितानां (कृते) तु वसुधा एव कुटुम्बकम् (अस्ति)।]

**परोपकाराय फलन्ति वृक्षाः परोपकाराय वहन्ति नद्यः।**
**परोपकाराय दुहन्ति गावः परोपकारार्थमिदं शरीरम् ।।३।।**

[वृक्षाः परोपकाराय फलन्ति। नद्यः परोपकाराय वहन्ति। गावः परोपकाराय दुहन्ति। इदं शरीरं परोपकारार्थम् (एव अस्ति) ।]

**जाड्यं धियो हरति सिञ्चति वाचि सत्यं**
**मानोन्नतिं दिशति पापमपाकरोति।**
**चित्तं प्रसादयति दिक्षु तनोति कीर्तिं**
**सत्सङ्गतिः कथय किं न करोति पुंसाम् ।।४।।**

[सत्सङ्गतिः धियः जाड्यं हरति, वाचि सत्यं सिञ्चति, मानोन्नतिं दिशति, पापम् अपाकरोति, चित्तं प्रसादयति, दिक्षु कीर्तिं तनोति। कथय ! (सा सत्सङ्गतिः) पुंसां किं (हितं) न करोति ?]

**यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।।५।।**

[यत्र नार्यः पूज्यन्ते तत्र देवताः रमन्ते। यत्र तु एताः न पूज्यन्ते तत्र सर्वाः क्रियाः अफलाः (भवन्ति)। ]

## भाषाभ्यासः



**श्लोकः १**

**१. एकवाक्येन उत्तरत।**

अ) कैः धनं न ह्रियते ?

आ) केषु धनं न विभज्यते ?

इ) सर्वधनप्रधानं किम् ?

**२. माध्यमभाषया उत्तरत।**

विद्याधनं व्यये कृते कथं वर्धते ?

**३. सन्धिविग्रहं कुरुत।** वर्धत एव।

**४. समानार्थकशब्दं लिखत।**

चोरः, भारः, नित्यम्, विद्या, धनम्, प्रधानम्।

**५. विरुद्धार्थकशब्दं लिखत।**

व्ययः, नित्यम्, प्रधानम्।

**श्लोकः २**

**१. सन्धिं कुरुत।**

(अ) परः + वा + इति

(आ) वसुधा + एव

**२. एकवाक्येन उत्तरत।**

अ) 'अयं निजः, अयं परः' इति केषां गणना ?

आ) केषां कृते वसुधा एव कुटुम्बकम् भवति ?

**३. माध्यमभाषया उत्तरत।**

लघुचेतसः उदारचेतसः जनाः कथम् अभिज्ञातव्याः ?

**४. स्तम्भमेलनं कुरुत**

| | | | | |
|---|---|---|---|---|
| अ | स्वीयम् | चिन्तनम् | अन्यः | पृथिवी |
| आ | गणना | वसुधा | निजः | परः |

**श्लोकः ३**

**१. एकवाक्येन उत्तरत।**

अ) परोपकाराय वृक्षाः किं कुर्वन्ति ?

आ) परोपकाराय नद्यः किं कुर्वन्ति ?

इ) काः परोपकाराय दुहन्ति ?

ई) शरीरं किमर्थम् ?

**२. माध्यमभाषया उत्तरत।**

परोपकारः नाम किम् ? के परोपकारमग्नाः ?

**३. समानार्थकशब्दं लिखत।**

वृक्षाः, नद्यः, शरीरम्।

**४. विरुद्धार्थकशब्दं लिखत।** उपकारः, परः।

**श्लोकः ४**

**१. रिक्तस्थानं पूरयत।**

अ) सत्सङ्गतिः धियः जाड्यं ______।

आ) सत्सङ्गतिः वाचि ______ सिञ्चति।

इ) सत्सङ्गतिः ______ दिशति।

ई) सत्सङ्गतिः पापम् ______।

उ) सत्सङ्गतिः चित्तं ______।

ऊ) सत्सङ्गतिः दिक्षु ______ तनोति।

**२. माध्यमभाषया उत्तरत।**

सत्सङ्गतिः जीवने किं किं करोति ?

**श्लोकः ५**

**१. सन्धिविग्रहं कुरुत।**

नार्यस्तु, यत्रैताः, एतास्तु, तत्राफलाः, सर्वास्तत्र।

**२. एकवाक्येन उत्तरत।**

अ) देवताः कुत्र रमन्ते ?

आ) क्रियाः कुत्र अफलाः भवन्ति ?

**३. माध्यमभाषया उत्तरत।**

'यत्र नार्यः पूज्यन्ते'। इति सूक्तिं श्लोकस्य आधारेण स्पष्टीकुरुत।

**४. 'नारी' इत्यर्थम् अमरकोषपङ्क्तिं लिखत।**

| ।। अमरकोषः ।। | विग्रहः। |
|---|---|
| राजा – राजा राट् पार्थिवः क्ष्माभृन्नृपभूपमहीक्षितः। | राजा, राट्, पार्थिवः, क्ष्माभृत्, नृपः, भूपः, महीक्षितः। |
| गुरुः – उपाध्यायोऽध्यापकोऽथ स्यान्निषेकादिकृद्गुरुः। | उपाध्यायः, अध्यापकः, निषेकादिकृत्, गुरुः। |
| नासिका – क्लीबे घ्राणं गन्धवहा घोणा नासा च नासिका। | घ्राणम्, गन्धवहा, घोणा, नासा, नासिका। |
| नेत्रम् – लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी। | लोचनम्, नयनम्, नेत्रम्, ईक्षणम्, चक्षुः, अक्षिः। |
| कर्णः – कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः। | कर्णः, शब्दग्रहः, श्रोत्रम्, श्रुतिः, श्रवणम्, श्रवः। |
| षट्पदः– द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः। | द्विरेफः, पुष्पलिट्, भृङ्गः, षट्पदः, भ्रमरः, अलिः। |
| मानवाः – मनुष्या मानुषा मर्त्या मनुजा मानवा नराः। | मनुष्याः, मानुषाः, मर्त्याः, मनुजाः, मानवाः, नराः। |
| नारी – स्त्री योषिदङ्गना योषा नारी सीमन्तिनी वधूः। | स्त्री, योषित्, अङ्गना, योषा, नारी, सीमन्तिनी, वधूः। |
| निपुणः – प्रवीणो निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः। | प्रवीणः, निपुणः, अभिज्ञ, विज्ञः, निष्णातः, शिक्षितः। |
| मार्गः – अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिः। | अयनम्, वर्त्म, मार्गः, अध्वा, पन्थाः, पदवी सृतिः। |
| सैनिकः – भटा योधाश्च योद्धारः सेनारक्षास्तु सैनिकाः। | भटाः, योधाः, योद्धारः, सेनारक्षाः, सैनिकाः। |
| निद्रा – स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि। | निद्रा, शयनम्, स्वापः, स्वप्नः, संवेशः। |
| बुद्धिः – बुद्धिर्मनीषा धिषणाधीः प्रज्ञा शेमुषी मतिः। | बुद्धिः, मनीषा, धिषणा, धीः, प्रज्ञा, शेमुषी, मतिः। |
| वचः – व्याहार उक्तिर्लपितं भाषितं वचनं वचः। | व्याहारः, उक्तिः, लपितम्, भाषितम्, वचनम्, वचः। |
| शत्रुः – रिपौ वैरिसप्नारिद्विषद्द्वेषणदुर्हृदः। | रिपुः, वैरी, सपत्नः, अरिः, द्विषद्, द्वेषणः, दुर्हृद्। |